

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## प्रथमकाण्डे अष्टमः प्रश्नः

### राजसूयः

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

अनुमत्यै पुरोडाशम्। अनुमत्या इत्यनु—मत्यै। पुरोडाशमष्टाकपालम्। अष्टाकपालम् निः। अष्टाकपालमित्यष्टा—कपालम्। निर् वपति। वपति धेनुः। धेनुर् दक्षिणा। दक्षिणा ये। ये प्रत्यञ्चः। प्रत्यञ्चः शम्यायाः। शम्याया अवशीयन्ते। अवशीयन्ते तम्। अवशीयन्त इत्यव—शीयन्ते। तम् नैर्ऋतम्। नैर्ऋतमेककपालम्। नैर्ऋतमिति नैः—ऋतम्। एकक-पालम् कृष्णम्। एककपालमित्येक—कपालम्। कृष्णँव्वासः। वासः कृष्णतूषम्। कृष्णतूषम् दक्षिणा। कृष्णतूषमिति कृष्ण—तूषम्। दक्षिणा वि। वीहि। इहि स्वाहा। स्वाहाऽऽहुतिम्। आहुतिम् जुषाणः। आहुतिमित्या—हुतिम्। जुषाण एषः। एष ते। ते निर्ऋते। निर्ऋते भागः। निर्ऋत इति निः—ऋते। भागो भूते। भूते हविष्मती। हविष्मत्यसि। असि मुञ्च। मुञ्चेमम्। इम-मꣳहसः। अꣳहसः स्वाहा। स्वाहा नमः। नमो यः। य इदम्। इदम् चकार। चकारादित्यम्। आदित्यम् चरुम्। चरुम् निः। निर् वपति। वपति वरः। वरो दक्षिणा। दक्षिणाऽऽग्ना-वैष्णवम्। आग्नावैष्णवमेकादशकपालम्। आग्नावैष्णवमित्याग्ना—वैष्णवम्। एकादशकपाल-व्वामनः। एकादशकपालमित्येकादश—कपालम्। वामनो वही। वही दक्षिणा। दक्षिणा ऽग्नीषोमीयम्। अग्नीषोमीयमेकादशकपालम्। अग्नीषोमीयमित्यग्नी—सोमीयम्। ॥ [१] ॥

एकादशकपालꣳ हिरण्यम्। एकादशकपालमित्येकादश—कपालम्। हिरण्यम् दक्षिणा। दक्षिणैन्द्रम्। ऐन्द्रमेकादशकपालम्। एकादशकपालमृषभः। एकादशकपालमित्येकादश—

क॒पा॒ल॒म्। ऋ॒ष॒भो व॒ही। व॒ही दख्षि॑णा। दख्षि॑णाऽऽग्ने॒यम्। आ॒ग्ने॒यम॒ष्टाक॑पालम्। अ॒ष्टाक॑-
पालमै॒न्द्रम्। अ॒ष्टाक॑पाल॒मित्य॒ष्टा—क॒पा॒ल॒म्। ऐ॒न्द्रम् दधि॑। दध्यृ॑ष॒भः। ऋ॒ष॒भो व॒ही। व॒ही
दख्षि॑णा। दख्षि॑णैन्द्रा॒ग्नम्। ऐ॒न्द्रा॒ग्नम् द्वाद॑शकपालम्। ऐ॒न्द्रा॒ग्नमित्यैँ᳚न्द्र—अ॒ग्नम्। द्वाद॑शक-
पालँव्वैश्वदे॒वम्। द्वाद॑शकपाल॒मिति॒ द्वाद॑श—क॒पा॒ल॒म्। वै॒श्व॒दे॒वम् च॒रुम्। वै॒श्व॒दे॒वमिति॑ वैश्व—
दे॒वम्। च॒रुम् प्र॑थम॒जः। प्र॒थ॒म॒जो व॒थ्सः। प्र॒थ॒म॒ज इति॑ प्रथम—जः। व॒थ्सो दख्षि॑णा।
दख्षि॑णा सौ॒म्यम्। सौ॒म्यꣳ श्या॑मा॒कम्। श्या॒मा॒कम् च॒रुम्। च॒रुँव्वासः॑। वासो॒ दख्षि॑णा।
दख्षि॑णा॒ सर॑स्वत्यै। सर॑स्वत्यै च॒रुम्। च॒रुꣳ सर॑स्वते। सर॑स्वते च॒रुम्। च॒रुम् मि॑थु॒नौ।
मि॒थु॒नौ गावौ᳚। गावौ॒ दख्षि॑णा। दख्षि॒णेति॒ दख्षि॑णा॥ ॥ [२] ॥

(अ॒ग्नी॒षो॒मी॒यं॑ चतु॑स्त्रिꣳशच्च) ॥ १ ॥

आ॒ग्ने॒यम॒ष्टाक॑पालम्। अ॒ष्टाक॑पाल॒म् निः। अ॒ष्टाक॑पाल॒मित्य॒ष्टा—क॒पा॒ल॒म्। निर्व॑पति॥
व॒प॒ति॒ सौ॒म्यम्। सौ॒म्यम् च॒रुम्। च॒रुꣳ सा॑वि॒त्रम्। सा॒वि॒त्रम् द्वाद॑शकपालम्। द्वाद॑शक-
पालꣳ सारस्व॒तम्। द्वाद॑शकपाल॒मिति॒ द्वाद॑श—क॒पा॒ल॒म्। सा॒र॒स्व॒तम् च॒रुम्। च॒रुम् पौ॒ष्णम्।
पौ॒ष्णम् च॒रुम्। च॒रुम् मा॑रु॒तम्। मा॒रु॒तꣳ स॒प्तक॑पालम्। स॒प्तक॑पालँव्वैश्वदे॒वीम्। स॒प्तक॑पाल॒-
मिति॑ स॒प्त—क॒पा॒ल॒म्। वै॒श्व॒दे॒वीमा॒मिख्षा᳚म्। वै॒श्व॒दे॒वीमिति॑ वैश्व—दे॒वीम्। आ॒मिख्षा᳚म् द्यावा-
पृथि॒व्य᳚म्। द्या॒वा॒पृ॒थि॒व्य᳚मेक॑कपालम्। द्या॒वा॒पृ॒थि॒व्य᳚मिति॑ द्यावा—पृ॒थि॒व्य᳚म्। एक॑कपाल॒मि-
त्येक॑—क॒पा॒ल॒म्॥ ॥ [३] ॥

(आ॒ग्ने॒य सौ॒म्यं मा॑रु॒त म॒ष्टाद॑श) ॥ २ ॥

ऐ॒न्द्रा॒ग्नमेका॑दशकपालम्। ऐ॒न्द्रा॒ग्नमित्यैँ᳚न्द्र—अ॒ग्नम्। एका॑दशकपालम् मा॒रु॒तीम्। एका॑-
दशकपाल॒मित्येका॑दश—क॒पा॒ल॒म्। मा॒रु॒तीमा॒मिख्षा᳚म्। आ॒मिख्षा᳚व्वारु॒णीम्। वा॒रु॒णीमा॒-
मिख्षा᳚म्। आ॒मिख्षा᳚म् का॒यम्। का॒यमेक॑कपालम्। एक॑कपालम् प्रघा॒स्यान्। एक॑कपाल॒मि-
त्येक॑—क॒पा॒ल॒म्। प्र॒घा॒स्यान्हवामहे। प्र॒घा॒स्या॑निति॑ प्र—घा॒स्यान्। ह॒वा॒म॒हे॒ म॒रुतः॑। म॒रुतो॑

यज्ञवाहसः। यज्ञवाहसः करम्भेण। यज्ञवाहस इति यज्ञ—वाहसः। करम्भेण सजोषसः। सजोषस इति स—जोषसः॥ मो षू णः। मो इति मो। सु नः। न इन्द्र। इन्द्र पृथ्सु। पृथ्सु देव। पृथ्स्विति पृत्—सु। देवास्तु। अस्तु स्म। स्म ते। ते शुष्मिन्न्। शुष्मिन्नवया। अवयेत्यवया॥ मही हि। ह्यस्य। अस्य मीढुषः। मीढुषो यव्या। यव्येति यव्या॥ हविष्मतो मरुतः। मरुतो वन्दते। वन्दते गीः। गीरिति गीः॥ यद् ग्रामे। ग्रामे यत्। यदरण्ये। अरण्ये यत्। यथ् सभायाम्। सभायाँय्यत्। यदिन्द्रिये। इन्द्रिय इतीन्द्रिये॥ यच्छूद्रे। शूद्रे यत्। यदर्ये। अर्य एनः। एनश्चकृम। चकृमा वयम्। वयमिति वयम्॥ यदेकस्य। एकस्याधि। अधि धर्मणि। धर्मणि तस्य। तस्यावयजनम्। अवयजनमसि। अवयजनमित्यव—यजनम्। असि स्वाहा। स्वाहेति स्वाहा॥ अक्रन्,कर्म। कर्म कर्मकृतः। कर्मकृतः सह। कर्मकृत इति कर्म—कृतः। सह वाचा। वाचा मयोभुवा। मयोभुवेति मयः—भुवा॥ देवेभ्यः कर्म। कर्म कृत्वा। कृत्वाऽस्तम्। अस्तम् प्र। प्रेत। इत सुदानवः। सुदानव इति सु—दानवः॥ ॥ [४] ॥

(वयय्यँद् विꣳशतिश्च) ॥ ३ ॥

अग्नयेऽनीकवते। अनीकवते पुरोडाशम्। अनीकवत इत्यनीक—वते। पुरोडाशमष्टाकपालम्। अष्टाकपालम् निः। अष्टाकपालमित्यष्टा—कपालम्। निर् वपति। वपति साकम्। साकꣳ सूर्येण। सूर्येणोद्यता। उद्यता मरुद्भ्यः। उद्यतेत्युत्—यता। मरुद्भ्यः सान्तपनेभ्यः। मरुद्भ्य इति मरुत्—भ्यः। सान्तपनेभ्यो मद्ध्यन्दिने। सान्तपनेभ्य इति साम्—तपनेभ्यः। मद्ध्यन्दिने चरुम्। चरुम् मरुद्भ्यः। मरुद्भ्यो गृहमेधिभ्यः। मरुद्भ्य इति मरुत्—भ्यः। गृहमेधिभ्यः सर्वासाम्। गृहमेधिभ्य इति गृहमेधि—भ्यः। सर्वासाम् दुग्धे। दुग्धे सायम्। सायम् चरुम्। चरुम् पूर्णा। पूर्णा दर्वि। दर्वि परा। परा पत। पत सुपूर्णा। सुपूर्णा पुनः। सुपूर्णेति सु—पूर्णा। पुनरा। आ पत। पतेति पत॥ वस्नेव। इव वि। वि क्रीणावहै। क्रीणावहा इषम्। इषमूर्जम्। ऊर्जꣳ शतक्रतो। शतक्रतो इति शत—क्रतो॥ देहि मे। मे ददामि। ददामि ते। ते नि। नि मे। मे धेहि। धेहि नि। नि ते। ते दधे। दध इति दधे॥ निहारमित्। निहारमिति नि—हारम्। इन्नि। नि मे। मे हर। हरा निहारम्। निहारम् नि। निहारमिति नि—

हारम्। ॥ [५] ॥ नि हरामि। हरामि ते। त इति ते॥ मरुद्भ्यः क्रीडिभ्यः। मरुद्भ्य इति मरुत्—भ्यः। क्रीडिभ्यः पुरोडाशम्। क्रीडिभ्य इति क्रीडि—भ्यः। पुरोडाशꣳ सप्तकपालम्। सप्तकपालम् निः। सप्तकपालमिति सप्त—कपालम्। निर् वपति। वपति साकम्। साकꣳ सूर्येण। सूर्येणोद्यता। उद्यता ऽऽग्नेयम्। उद्यतेत्युत्—यता। आग्नेयमष्टाकपालम्। अष्टाकपालम् निः। अष्टाकपालमित्यष्टा—कपालम्। निर् वपति। वपति सौम्यम्। सौम्यम् चरुम्। चरुꣳ सावित्रम्। सावित्रम् द्वादशकपालम्। द्वादशकपालꣳ सारस्वतम्। द्वादशकपालमिति द्वादश—कपालम्। सारस्वतम् चरुम्। चरुम् पौष्णम्। पौष्णम् चरुम्। चरुमैन्द्राग्नम्। ऐन्द्राग्नमेकादशकपालम्। ऐन्द्राग्नमित्यैन्द्र—अग्नम्। एकादशकपालमैन्द्रम्। एकादशकपालमित्येकादश—कपालम्। ऐन्द्रम् चरुम्। चरुँवैश्वकर्मणम्। वैश्वकर्मणमेककपालम्। वैश्वकर्मणमिति वैश्व—कर्मणम्। एककपालमित्येक—कपालम्॥ ॥ [६] ॥

(हरा निहारं त्रिꣳशच्च) ॥ ४ ॥

सोमाय पितृमते। पितृमते पुरोडाशम्। पितृमत इति पितृ—मते। पुरोडाशꣳ षट्कपालम्। षट्कपालम् निः। षट्कपालमिति षट्—कपालम्। निर् वपति। वपति पितृभ्यः। पितृभ्यो बर्हिषद्भ्यः। पितृभ्य इति पितृ—भ्यः। बर्हिषद्भ्यो धानाः। बर्हिषद्भ्य इति बर्हिषत्—भ्यः। धानाः पितृभ्यः। पितृभ्योऽग्निष्वात्तेभ्यः। पितृभ्य इति पितृ—भ्यः। अग्निष्वात्तेभ्योऽभिवान्यायै। अग्निष्वात्तेभ्य इत्यग्नि—स्वात्तेभ्यः। अभिवान्यायै दुग्धे। अभिवान्याया इत्यभि—वान्यायै। दुग्धे मन्थम्। मन्थमेतत्। एतत् ते। ते तत। तत ये। ये च। च त्वाम्। त्वामनु। अन्वेतत्। एतत् ते। ते पितामह। पितामह प्रपितामह। प्रपितामह ये। प्रपितामहेति प्र—पितामह। ये च। च त्वाम्। त्वामनु। अन्वत्र। अत्र पितरः। पितरो यथाभागम्। यथाभागम् मन्दद्ध्वम्। यथाभागमिति यथा—भागम्। मन्दद्ध्वꣳ सुसन्दृशम्। सुसन्दृशम् त्वा। सुसन्दृशमिति सु—सन्दृशम्। त्वा वयम्। वयम् मघवन्न्। मघवन्,मन्दिषीमहि। मघवन्निति मघ—वन्न्। मन्दिषीमहीति मन्दिषीमहि॥ प्र नूनम्। नूनम् पूर्णवन्धुरः। पूर्णवन्धुरः स्तुतः। पूर्णवन्धुर इति पूर्ण—वन्धुरः। स्तुतो यासि। यासि वशान्। वशाꣳ अनु। अन्वित्यनु॥ योजा

नु। न्विन्द्र। इन्द्र ते। ते हरी। हरी इति हरी॥ ॥ [७] ॥ अक्षन्नमीमदन्त। अमीमदन्त हि। ह्यव। अव प्रियाः। प्रिया अधूषत। अधूषतेत्यधूषत॥ अस्तोषत स्वभानवः। स्वभानवो विप्राः। स्वभानव इति स्व—भानवः। विप्रा नविष्ठया। नविष्ठया मती। मतीति मती॥ योजा नु। न्विन्द्र। इन्द्र ते। ते हरी। हरी इति हरी॥ अक्षन्‌पितरः। पितरोऽमीमदन्त। अमीमदन्त पितरः। पितरोऽतीतृपन्त। अतीतृपन्त पितरः। पितरोऽमीमृजन्त। अमीमृजन्त पितरः। पितर इति पितरः॥ परेत। इत पितरः। पितरः सोम्याः। सोम्या गम्भीरैः। गम्भीरैः पथिभिः। पथिभिः पूर्व्यैः। पथिभिरिति पथि—भिः। पूर्व्यैरिति पूर्व्यैः॥ अथा पितृन्। पितृन्थ्सुविदत्रान्। सुविदत्राꣳ अपि। सुविदत्रानिति सु—विदत्रान्। अपीत। इत यमेन। यमेन ये। ये सधमादम्। सधमादम् मदन्ति। सधमादमिति सध—मादम्। मदन्तीति मदन्ति॥ मनो नु। न्वा। आ हुवामहे। हुवामहे नाराशꣳसेन। नाराशꣳसेन स्तोमेन। स्तोमेन पितृणाम्। पितृणाम् च। च मन्मभिः। मन्मभिरिति मन्म—भिः॥ आ नः। ॥ [८] ॥ न एतु। एतु मनः। मनः पुनः। पुनः क्रत्वे। क्रत्वे दक्षाय। दक्षाय जीवसे। जीवस इति जीवसे॥ ज्योक्‌ च। च सूर्यम्। सूर्यम् दृशे। दृश इति दृशे॥ पुनर्‌नः। नः पितरः। पितरो मनः। मनो ददातु। ददातु दैव्यः। दैव्यो जनः। जन इति जनः॥ जीवव्ँव्रातम्। व्रातꣳ सचेमहि। सचेमहीति सचेमहि॥ यदन्तरिक्षम्। अन्तरिक्षम् पृथिवीम्। पृथिवीमुत। उत द्याम्। द्याय्ँयत्। यन्मातरम्। मातरम् पितरम्। पितरव्ँवा। वा जिहिꣳसिम॥ जिहिꣳसिमेति जिहिꣳसिम॥ अग्निर् मा। मा तस्मात्। तस्मादेनसः। एनसो गार्हपत्यः। गार्हपत्यः प्र। गार्हपत्य इति गार्ह—पत्यः। प्र मुञ्चतु। मुञ्चतु दुरिता। दुरिता यानि। दुरितेति दुः—इता। यानि चकृम। चकृम करोतु। करोतु माम्। मामनेनसम्। अनेनसमित्यनेनसम्॥ ॥ [९] ॥

(हरी मन्मभिरा चतुश्चत्वारिꣳशच्च) ॥ ५ ॥

प्रतिपूरुषमेककपालान्। प्रतिपूरुषमिति प्रति—पूरुषम्। एककपालान् निः। एककपालानित्येक—कपालान्। निर् वपति। वपत्येकम्। एकमतिरिक्तम्। अतिरिक्तय्ँयावन्तः। अतिरिक्तमित्यति—रिक्तम्। यावन्तो गृह्याः। गृह्याः स्मः। स्मस्तेभ्यः। तेभ्यः कम्। कमकरम्। अकरम्

पशूनाम्। पशूनाꣳ शर्म। शर्मासि। असि शर्म। शर्म यजमानस्य। यजमानस्य शर्म। शर्म मे। मे यच्छ। यच्छैकः। एक एव। एव रुद्रः। रुद्रो न। न द्वितीयाय। द्वितीयाय तस्थे। तस्थ आखुः। आखुस्ते। ते रुद्र। रुद्र पशुः। पशुस्तम्। तम् जुषस्व। जुषस्वैषः। एष ते। ते रुद्र। रुद्र भागः। भागः सह। सह स्वस्रा। स्वस्राऽम्बिकया। अम्बिकया तम्। तम् जुषस्व। जुषस्व भेषजम्। भेषजम् गवे। गवेऽश्वाय। अश्वाय पुरुषाय। पुरुषाय भेषजम्। भेषजमथो। अथो अस्मभ्यम्। अथो इत्यथो। अस्मभ्यम् भेषजम्। अस्मभ्यमित्यस्म—भ्यम्। भेषजꣳ सुभेषजम्। सुभेषज-ँय्यथा। सुभेषजमिति सु—भेषजम्। ॥ [१०] ॥ यथाऽसति। असतीत्यसति॥ सुगम् मेषाय। सुगमिति सु—गम्। मेषाय मेष्यै। मेष्या अव। अवाम्ब। अम्ब रुद्रम्। रुद्रमदिमहि। अदिमह्यव। अव देवम्। देवम् त्र्यम्बकम्। त्र्यम्बकमिति त्रि—अम्बकम्॥ यथा नः। नः श्रेयसः। श्रेयसः करत्। करद् यथा। यथा नः। नो वस्यसः। वस्यसः करत्। करद् यथा। यथा नः। नः पशुमतः। पशुमतः करत्। पशुमत इति पशु—मतः। करद् यथा। यथा नः। नो व्यवसाययात्। व्यवसाययादिति वि—अवसाययात्॥ त्र्यम्बकँय्यजामहे। त्र्यम्बकमिति त्रि—अम्बकम्। यजामहे सुगन्धिम्। सुगन्धिम् पुष्टिवर्द्धनम्। सुगन्धिमिति सु—गन्धिम्। पुष्टिवर्द्धनमिति पुष्टि—वर्द्धनम्॥ उर्वारुकमिव। इव बन्धनात्। बन्धनान्‌मृत्योः। मृत्योर्‌मुक्षीय। मुक्षीय मा। माऽमृतात्। अमृतादित्यमृतात्॥ एष ते। ते रुद्र। रुद्र भागः। भागस्तम्। तम् जुषस्व। जुषस्व तेन। तेनावसेन। अवसेन परः। परो मूजवतः। मूजवतोऽति। मूजवत इति मूज—वतः। अतीहि। इह्यवततधन्वा। अवततधन्वा पिनाकहस्तः। अवततधन्वेत्यवतत—धन्वा। पिनाकहस्तः कृत्तिवासाः। पिनाकहस्त इति पिनाक—हस्तः। कृत्तिवासा इति कृत्ति—वासाः॥ ॥ [११] ॥

(सुभेषज मिहि त्रीणि च) ॥ ६ ॥

ऐन्द्राग्नम् द्वादशकपालम्। ऐन्द्राग्नमित्यैन्द्र—अग्नम्। द्वादशकपालँव्वैश्वदेवम्। द्वादशकपालमिति द्वादश—कपालम्। वैश्वदेवम् चरुम्। वैश्वदेवमिति वैश्व—देवम्। चरुमिन्द्राय। इन्द्राय शुनासीराय। शुनासीराय पुरोडाशम्। पुरोडाशम् द्वादशकपालम्। द्वादशकपालँव्वायव्यम्।

द्वादशकपालमिति द्वादश—कपालम्। वायव्यम् पयः। पयः सौर्यम्। सौर्यमेककपालम्। एक-
कपालम् द्वादशगवम्। एककपालमित्येक—कपालम्। द्वादशगवꣳ सीरम्। द्वादशगवमिति
द्वादश—गवम्। सीरम् दख्षिणा। दख्षिणाऽऽग्नेयम्। आग्नेयमष्टाकपालम्। अष्टाकपालम्
निः। अष्टाकपालमित्यष्टा—कपालम्। निर् वपति। वपति रौद्रम्। रौद्रम् गावीधुकम्। गावी-
धुकम् चरुम्। चरुमैन्द्रम्। ऐन्द्रम् दधि। दधि वारुणम्। वारुणय्ँ यवमयम्। यवमयम् चरुम्।
यवमयमिति यव—मयम्। चरुव्ँ वहिनी। वहिनी धेनुः। धेनुर् दख्षिणा। दख्षिणा ये। ये
देवाः। देवाः पुरस्सदः। पुरस्सदोऽग्निनेत्राः। पुरस्सद इति पुरः—सदः। अग्निनेत्रा दख्षिण-
सदः। अग्निनेत्रा इत्यग्नि—नेत्राः। दख्षिणसदो यमनेत्राः। दख्षिणसद इति दख्षिण—सदः।
यमनेत्राः पश्चात्सदः। यमनेत्रा इति यम—नेत्राः। पश्चात्सदः सवितृनेत्राः। पश्चात्सद इति
पश्चात्—सदः। सवितृनेत्रा उत्तरसदः। सवितृनेत्रा इति सवितृ—नेत्राः। उत्तरसदो वरुण-
नेत्राः। उत्तरसद इत्युत्तर—सदः। वरुणनेत्रा उपरिषदः। वरुणनेत्रा इति वरुण—नेत्राः। उप-
रिषदो बृहस्पतिनेत्राः। उपरिषद इत्युपरि—सदः। बृहस्पतिनेत्रा रख्षोहनः। बृहस्पतिनेत्रा इति
बृहस्पति—नेत्राः। रख्षोहणस्ते। रख्षोहण इति रख्षः—हनः। ते नः। नः पान्तु। पान्तु ते। ते
नः। नोऽवन्तु। अवन्तु तेभ्यः। तेभ्यो नमः। ॥ [१२] ॥ नमस्तेभ्यः। तेभ्यः स्वाहा। स्वाहा
समूढम्। समूढꣳ रख्षः। समूढमिति सम्—ऊढम्। रख्षः सन्दग्धम्। सन्दग्धꣳ रख्षः।
सन्दग्धमिति सम्—दग्धम्। रख्ष इदम्। इदमहम्। अहꣳ रख्षः। रख्षोऽभि। अभि सम्।
सम् दहामि। दहाम्यग्नये। अग्नये रख्षोघ्ने। रख्षोघ्ने स्वाहा। रख्षोघ्न इति रख्षः—घ्ने। स्वाहा
यमाय। यमाय सवित्रे। सवित्रे वरुणाय। वरुणाय बृहस्पतये। बृहस्पतये दुवस्वते। दुवस्वते
रख्षोघ्ने। रख्षोघ्ने स्वाहा। रख्षोघ्न इति रख्षः—घ्ने। स्वाहा प्रष्टिवाही। प्रष्टिवाही रथः। प्रष्टि-
वाहीति प्रष्टि—वाही। रथो दख्षिणा। दख्षिणा देवस्य। देवस्य त्वा। त्वा सवितुः। सवितुः
प्रसवे। प्रसवेऽश्विनोः। प्रसव इति प्र—सवे। अश्विनोर् बाहुभ्याम्। बाहुभ्याम् पूष्णः। बाहुभ्या-
मिति बाहु—भ्याम्। पूष्णो हस्ताभ्याम्। हस्ताभ्याꣳ रख्षसः। रख्षसो वधम्। वधम् जुहोमि।
जुहोमि हतम्। हतꣳ रख्षः। रख्षोऽवधिष्म। अवधिष्म रख्षः। रख्षो यत्। यद् वस्ते। वस्ते
तत्। तद् दख्षिणा। दख्षिणेति दख्षिणा॥ ॥ [१३] ॥

(तेभ्यः पञ्चचत्वारिꣳशच्च) ॥ ७ ॥

धात्रे पुरोडाशम्। पुरोडाशम् द्वादशकपालम्। द्वादशकपालम् निः। द्वादशकपालमिति द्वादश—कपालम्। निर् वपति। वपत्यनुमत्यै। अनुमत्यै चरुम्। अनुमत्या इत्यनु—मत्यै। चरुꣳ राकायै। राकायै चरुम्। चरुꣳ सिनीवाल्यै। सिनीवाल्यै चरुम्। चरुम् कुह्वै। कुह्वै चरुम्। चरुम् मिथुनौ। मिथुनौ गावौ। गावौ दक्षिणा। दक्षिणाऽऽग्नावैष्णवम्। आग्नावैष्णवमेकादशकपालम्। आग्नावैष्णमित्याग्ना—वैष्णवम्। एकादशकपालम् निः। एकादशकपालमित्येकादश—कपालम्। निर्वपति। वपत्यैन्द्रावैष्णवम्। ऐन्द्रावैष्णवमेकादशकपालम्। ऐन्द्रावैष्णवमित्यैन्द्रा—वैष्णवम्। एकादशकपालँव्वैष्णवम्। एकादशकपालमित्येकादश—कपालम्। वैष्णवम् त्रिकपालम्। त्रिकपालँव्वामनः। त्रिकपालमिति त्रि—कपालम्। वामनो वही। वही दक्षिणा। दक्षिणाऽग्नीषोमीयम्। अग्नीषोमीयमेकादशकपालम्। अग्नीषोमीयमित्यग्नी—सोमीयम्। एकादशकपालम् निः। एकादशकपालमित्येकादश—कपालम्। निर् वपति। वपतीन्द्रासोमीयम्। इन्द्रासोमीयमेकादशकपालम्। इन्द्रासोमीयमितीन्द्रा—सोमीयम्। एकादशकपालꣳ सौम्यम्। एकादशकपालमित्येकादश—कपालम्। सौम्यम् चरुम्। चरुम् बभ्रुः। बभ्रुर् दक्षिणा। दक्षिणा सोमापौष्णम्। सोमापौष्णम् चरुम्। सोमापौष्णमिति सोमा—पौष्णम्। चरुम् निः। निर् वपति। वपत्यैन्द्रापौष्णम्। ऐन्द्रापौष्णम् चरुम्। ऐन्द्रापौष्णमित्यैन्द्रा—पौष्णम्। चरुम् पौष्णम्। पौष्णम् चरुम्। चरुꣳ श्यामः। श्यामो दक्षिणा। दक्षिणा वैश्वानरम्। वैश्वानरम् द्वादशकपालम्। द्वादशकपालम् निः। द्वादशकपालमिति द्वादश—कपालम्। निर् वपति। वपति हिरण्यम्। हिरण्यम् दक्षिणा। दक्षिणा वारुणम्। वारुणय्ँयवमयम्। यवमयम् चरुम्। यवमयमिति यव—मयम्। चरुमश्वः। अश्वो दक्षिणा। दक्षिणेति दक्षिणा॥ ॥ [१४] ॥

(वैश्वानरं द्वादशकपालं नि रष्टौ च) ॥ ८ ॥

बार्हस्पत्यम् चरुम्। चरुम् निः। निर् वपति। वपति ब्रह्मणः। ब्रह्मणो गृहे। गृहे शितिपृष्ठः। शितिपृष्ठो दक्षिणा। शितिपृष्ठ इति शिति—पृष्ठः। दक्षिणैन्द्रम्। ऐन्द्रमेकादशकपालम्। एकादशकपालꣳ राजन्यस्य। एकादशकपालमित्येकादश—कपालम्। राजन्यस्य गृहे। गृह ऋषभः। ऋषभो दक्षिणा। दक्षिणाऽऽदित्यम्। आदित्यम् चरुम्। चरुम् महिष्यै। महिष्यै गृहे। गृहे धेनुः। धेनुर्,दक्षिणा। दक्षिणा नैर्ऋतम्। नैर्ऋतम् चरुम्। नैर्ऋतमिति नैः—ऋतम्। चरुम् परिवृक्त्यै। परिवृक्त्यै गृहे। परिवृक्त्या इति परि—वृक्त्यै। गृहे कृष्णानाम्। कृष्णानाँव्ँव्रीहीणाम्। व्रीहीणाम् नखनिर्भिन्नम्। नखनिर्भिन्नम् कृष्णा। नखनिर्भिन्नमिति नख—निर्भिन्नम्। कृष्णा कूटा। कूटा दक्षिणा। दक्षिणाऽऽग्नेयम्। आग्नेयमष्टाकपालम्। अष्टाकपालꣳ सेनान्यः। अष्टाकपालमित्यष्टा—कपालम्। सेनान्यो गृहे। सेनान्य इति सेना—न्यः। गृहे हिरण्यम्। हिरण्यम् दक्षिणा। दक्षिणा वारुणम्। वारुणम् दशकपालम्। दशकपालꣳ सूतस्य। दशकपालमिति दश—कपालम्। सूतस्य गृहे। गृहे महानिरष्टः। महानिरष्टो दक्षिणा। महानिरष्ट इति महा—निरष्टः। दक्षिणा मारुतम्। मारुतꣳ सप्तकपालम्। सप्तकपालम् ग्रामण्यः। सप्तकपालमिति सप्त—कपालम्। ग्रामण्यो गृहे। ग्रामण्य इति ग्राम—न्यः। गृहे पृश्ञिः। पृश्ञिर्,दक्षिणा। दक्षिणा सावित्रम्। सावित्रम् द्वादशकपालम्। द्वादशकपालम् ख्षत्तुः। द्वादशकपालमिति द्वादश—कपालम्। ॥ [१५] ॥ ख्षत्तुर् गृहे। गृह उपध्वस्तः। उपध्वस्तो दक्षिणा। उपध्वस्त इत्युप—ध्वस्तः। दक्षिणा ऽऽश्विनम्। आश्विनम् द्विकपालम्। द्विकपालꣳ सङ्ग्रहीतुः। द्विकपालमिति द्वि—कपालम्। सङ्ग्रहीतुर्,गृहे। सङ्ग्रहीतुरिति सम्—गृहीतुः। गृहे सवात्यौ। सवात्यौ दक्षिणा। सवात्याविति स—वात्यौ। दक्षिणा पौष्णम्। पौष्णम् चरुम्। चरुम् भागदुघस्य। भागदुघस्य गृहे। भागदुघस्येति भाग—दुघस्य। गृहे श्यामः। श्यामो दक्षिणा। दक्षिणा रौद्रम्। रौद्रम् गावीधुकम्। गावीधुकम् चरुम्। चरुमख्षावापस्य। अख्षावापस्य गृहे। अख्षावापस्येत्यख्ष—आवापस्य। गृहे शबलः। शबल उद्वारः। उद्वारो दक्षिणा। उद्वार इत्युत्—वारः। दक्षिणेन्द्राय। इन्द्राय सुत्राम्णे। सुत्राम्णे पुरोडाशम्। सुत्राम्ण इति सु—त्राम्णे। पुरोडाशमेकादशकपालम्। एकादशकपालम् प्रति। एकादशकपालमित्येकादश—कपालम्। प्रति निः। निर् वपति। वपतीन्द्राय। इन्द्रायाꣳहो-

मुचे᳚। अꣳहोमुचेऽयम्। अꣳहोमुच इत्यꣳहः—मुचे᳚। अयम् नः। नो राजा᳚। राजा वृत्रहा। वृत्रहा राजा᳚। वृत्रहेति वृत्र—हा। राजा भूत्वा। भूत्वा वृत्रम्। वृत्रँव्वँद्ध्यात्। वद्ध्यान्मैत्रा-बार्हस्पत्यम्। मैत्राबार्हस्पत्यम् भवति। मैत्राबार्हस्पत्यमिति मैत्रा—बार्हस्पत्यम्। भवति श्वेतायै᳚। श्वेतायै᳚श्वेतवथ्सायै। श्वेतवथ्सायै दुग्धे। श्वेतवथ्साया इति श्वेत—वथ्सायै। दुग्धे स्वय-म्मूर्ते। स्वयम्मूर्ते स्वयम्मथिते। स्वयम्मूर्त इति स्वयम्—मूर्ते। स्वयम्मथित आज्ये᳚। स्वयम्म-थित इति स्वयम्—मथिते। आज्य आश्वत्थे। आश्वत्थे पात्रे᳚। ॥ [१६] ॥ पात्रे चतुःस्रक्तौ। चतुःस्रक्तौ स्वयमवपन्नायै᳚। चतुःस्रक्ताविति चतुः—स्रक्तौ। स्वयमवपन्नायै शाखायै। स्वय-मवपन्नाया इति स्वयम्—अवपन्नायै᳚। शाखायै कर्णान्। कर्णाꣳश्च। चाकर्णान्। अकर्णाꣳश्च। च तण्डुलान्। तण्डुलान्वि। वि चिनुयात्। चिनुयाद् ये। ये कर्णाः। कर्णाः सः। स पयसि। पयसि बार्हस्पत्यः। बार्हस्पत्यो ये। येऽकर्णाः। अकर्णाः सः। स आज्ये᳚। आज्ये मैत्रः। मैत्रः स्वयङ्कृता। स्वयङ्कृता वेदिः। स्वयङ्कृतेति स्वयं—कृता। वेदिर् भवति। भवति स्वय-न्दिनम्। स्वयन्दिनम् बर्हिः। स्वयन्दिनमिति स्वयम्—दिनम्। बर्हिः स्वयङ्कृतः। स्वय-ङ्कृत इद्ध्मः। स्वयङ्कृत इति स्वयम्—कृतः। इद्ध्मः सा। सैव। एव श्वेता। श्वेता श्वेत-वथ्सा। श्वेतवथ्सा दक्षिणा। श्वेतवथ्सेति श्वेत—वथ्सा। दक्षिणेति दक्षिणा॥ ॥ [१७] ॥

(सावित्रं द्वादशकपाल माश्वत्थे त्रयस्त्रिꣳशच्च) ॥ ९ ॥

---

अग्नये गृहपतये। गृहपतये पुरोडाशम्। गृहपतय इति गृह—पतये॥ पुरोडाशमष्टाक-पालम्। अष्टाकपालम् निः। अष्टाकपालमित्यष्टा—कपालम्। निर् वपति। वपति कृष्णानाम्। कृष्णानाँव्व्रीहीणाम्। व्रीहीणाꣳ सोमाय। सोमाय वनस्पतये। वनस्पतये श्यामाकम्। श्यामाकम् चरुम्। चरुꣳ सवित्रे। सवित्रे सत्यप्रसवाय। सत्यप्रसवाय पुरोडाशम्। सत्यप्रस-वायेति सत्य—प्रसवाय। पुरोडाशम् द्वादशकपालम्। द्वादशकपालमाशूनाम्। द्वादशकपाल-मिति द्वादश—कपालम्। आशूनाँव्व्रीहीणाम्। व्रीहीणाꣳ रुद्राय। रुद्राय पशुपतये। पशुपतये गावीधुकम्। पशुपतय इति पशु—पतये। गावीधुकम् चरुम्। चरुम् बृहस्पतये। बृहस्पतये वाचः। वाचस्पतये। पतये नैवारम्। नैवारम् चरुम्। चरुमिन्द्राय। इन्द्राय ज्येष्ठाय। ज्येष्ठाय

पुरोडाशम्। पुरोडाशमेकादशकपालम्। एकादशकपालम् महाव्रीहीणाम्। एकादशकपालमिति-त्येकादश—कपालम्। महाव्रीहीणाम् मित्राय। महाव्रीहीणामिति महा—व्रीहीणाम्। मित्राय सत्याय। सत्यायाम्बानाम्। आम्बानाम् चरुम्। चरुँव्वरुणाय। वरुणाय धर्मपतये। धर्मपतये यवमयम्। धर्मपतय इति धर्म—पतये। यवमयम् चरुम्। यवमयमिति यव—मयम्। चरुꣳ सविता। सविता त्वा। त्वा प्रसवानाम्। प्रसवानाꣳ सुवताम्। प्रसवानामिति प्र—सवानाम्। सुवतामग्निः। अग्निर् गृहपतीनाम्। गृहपतीनाꣳ सोमः। गृहपतीनामिति गृह—पतीनाम्। सोमो वनस्पतीनाम्। वनस्पतीनाꣳ रुद्रः। रुद्रः पशूनाम्। पशूनाम् बृहस्पतिः। ॥ [१८] ॥

बृहस्पतिर् वाचाम्। वाचामिन्द्रः। इन्द्रो ज्येष्ठानाम्। ज्येष्ठानाम् मित्रः। मित्रः सत्यानाम्। सत्यानाँव्वरुणः। वरुणो धर्मपतीनाम्। धर्मपतीनाय्ँये। धर्मपतीनामिति धर्म—पतीनाम्। ये देवाः। देवा देवसुवः। देवसुवः स्थ। देवसुव इति देव—सुवः। स्थ ते। त इमम्। इमममुष्या-यणम्। आमुष्यायणमनमित्राय। अनमित्राय सुवद्ध्वम्। सुवद्ध्वम् महते। महते ख्षत्राय। ख्षत्राय महते। महत आधिपत्याय। आधिपत्याय महते। आधिपत्यायेत्याधि—पत्याय। महते जानराज्याय। जानराज्यायैषः। जानराज्यायेति जान—राज्याय। एष वः। वो भरताः। भरता राजा। राजा सोमः। सोमोऽस्माकम्। अस्माकम् ब्राह्मणानाम्। ब्राह्मणानाꣳ राजा। राजा प्रति। प्रति त्यत्। त्यन्नाम। नाम राज्यम्। राज्यमधायि। अधायि स्वाम्। स्वाम् तनुवम्॥ तनुवँव्वरुणः। वरुणो अशिश्रेत्। अशिश्रेच्छुचेः। शुचेर् मित्रस्य। मित्रस्य व्रत्याः। व्रत्या अभूम। अभूमामन्महि। अमन्महि महतः। महत ऋतस्य। ऋतस्य नाम। नाम सर्वे। सर्वे व्राताः। व्राता वरुणस्य। वरुणस्याभूवन्न्। अभूवन् वि। वि मित्रः। मित्र एवैः। एवैररातिम्। अरातिमतारीत्। अतारीदसूषुदन्त। असूषुदन्त यज्ञियाः। यज्ञिया ऋतेन। ऋतेन वि। व्वु। उ त्रितः। त्रितो जरिमाणम्। जरिमाणम् नः। न आनट्। आनड् विष्णोः। विष्णोः क्रमः। क्रमोऽसि। असि विष्णोः। विष्णोः क्रान्तम्। क्रान्तमसि। असि विष्णोः। विष्णोर् विक्रान्तम्। विक्रान्तमसि। विक्रान्तमिति वि—क्रान्तम्। असीत्यसि॥ ॥ [१९] ॥

(पशूनां व्राताः पञ्चविꣳशतिश्च) ॥ १० ॥

अर्थेतः स्थ। अर्थेत इत्यर्थ—इतः। स्थापाम्। अपाम् पतिः। पतिरसि। असि वृषा। वृषाऽसि। अस्यूर्मिः। ऊर्मिर् वृषसेनः। वृषसेनोऽसि। वृषसेन इति वृष—सेनः। असि व्रज-क्षितः। व्रजक्षितः स्थ। व्रजक्षित इति व्रज—क्षितः। स्थ मरुताम्। मरुतामोजः। ओजः स्थ। स्थ सूर्यवर्चसः। सूर्यवर्चसः स्थ। सूर्यवर्चस इति सूर्य—वर्चसः। स्थ सूर्यत्वचसः। सूर्य-त्वचसः स्थ। सूर्यत्वचस इति सूर्य—त्वचसः। स्थ मान्दाः। मान्दाः स्थ। स्थ वाशाः। वाशाः स्थ। स्थ शक्वरीः। शक्वरीः स्थ। स्थ विश्वभृतः। विश्वभृतः स्थ। विश्वभृत इति विश्व—भृतः। स्थ जनभृतः। जनभृतः स्थ। जनभृत इति जन—भृतः। स्थाऽग्नेः। अग्नेस्तेजस्याः। तेजस्याः स्थ। स्थाऽपाम्। अपामोषधीनाम्। ओषधीनाꣳ रसः। रसः स्थ। स्थापः। अपो देवीः। देवीर्,मधुमतीः। मधुमतीरगृह्णन्न्। मधुमतीरिति मधु—मतीः। अगृह्णन्नूर्जस्वतीः। ऊर्जस्वती राजसूयाय। राजसूयाय चितानाः। राजसूयायेति राज—सूयाय। चिताना इति चितानाः॥ याभिर्,मित्रावरुणौ। मित्रावरुणावभ्यषिञ्चन्न्। मित्रावरुणाविति मित्रा—वरुणौ। अभ्यषिञ्च-न्याभिः। अभ्यषिञ्चन्नित्यभि—असिञ्चन्न्। याभिरिन्द्रम्। इन्द्रमनयन्न्। अनयन्नति। अत्य-रातीः। अरातीरित्यरातीः॥ राष्ट्रदाः स्थ। राष्ट्रदा इति राष्ट्र—दाः। स्थ राष्ट्रम्। राष्ट्रम् दत्त। दत्त स्वाहा। स्वाहा राष्ट्रदाः। राष्ट्रदाः स्थ। राष्ट्रदा इति राष्ट्र—दाः। स्थ राष्ट्रम्। राष्ट्रममुष्मै। अमुष्मै दत्त। दत्तेति दत्त॥ ॥ [२०] ॥

(अत्ये कादश च) ॥ ११ ॥

---

देवीरापः। आपः सम्। सम् मधुमतीः। मधुमतीर् मधुमतीभिः। मधुमतीरिति मधु—मतीः। मधुमतीभिः सृज्यद्ध्वम्। मधुमतीभिरिति मधु—मतीभिः। सृज्यद्ध्वम् महि। महि वर्चः। वर्चः क्षत्रियाय। क्षत्रियाय वन्वानाः। वन्वाना अनाधृष्टाः। अनाधृष्टाः सीदत। अनाधृष्टा इत्यना—धृष्टाः। सीदतोर्जस्वतीः। ऊर्जस्वतीर्,महि। महि वर्चः। वर्चः क्षत्रि-याय। क्षत्रियाय दधतीः। दधतीरनिभृष्टम्। अनिभृष्टमसि। अनिभृष्टमित्यनि—भृष्टम्। असि वाचः। वाचो बन्धुः। बन्धुस्तपोजाः। तपोजाः सोमस्य। तपोजा इति तपः—जाः। सोमस्य दात्रम्। दात्रमसि। असि शुक्राः। शुक्रा वः। वः शुक्रेण। शुक्रेणोत्। उत् पुनामि। पुनामि

चन्द्राः। चन्द्राश्चन्द्रेण। चन्द्रेणामृताः। अमृता अमृतेन। अमृतेन स्वाहा। स्वाहा राजसूयाय। राजसूयाय चिताना। राजसूयायेति राज—सूयाय। चिताना इति चितानाः॥ सधमादो द्युम्निनीः। सधमाद इति सध—मादः। द्युम्निनीरूर्जः। ऊर्ज एताः। एता अनिभृष्टाः। अनिभृष्टा अपस्युवः। अनिभृष्टा इत्यनि—भृष्टाः। अपस्युवो वसानः। वसान इति वसानः॥ पस्त्यासु चक्रे। चक्रे वरुणः। वरुणः सधस्थम्। सधस्थमपाम्। सधस्थमिति सध—स्थम्। अपाꣳ शिशुः। शिशुर्मातृतमासु। ॥ [२१] ॥ मातृतमास्वन्तः। मातृतमास्विति मातृ—तमासु। अन्तरित्यन्तः॥ क्षत्रस्योल्बम्। उल्बमसि। असि क्षत्रस्य। क्षत्रस्य योनिः। योनिरसि। अस्याविन्नः। आविन्नो अग्निः। अग्निर् गृहपतिः। गृहपतिराविन्नः। गृहपतिरिति गृह—पतिः। आविन्न इन्द्रः। इन्द्रो वृद्धश्रवाः। वृद्धश्रवा आविन्नः। वृद्धश्रवा इति वृद्ध—श्रवाः। आविन्नः पूषा। पूषा विश्ववेदाः। विश्ववेदा आविन्नौ। विश्ववेदा इति विश्व—वेदाः। आविन्नौ मित्रावरुणौ। मित्रावरुणावृतावृधौ। मित्रावरुणाविति मित्रा—वरुणौ। ऋतावृधावाविन्ने। ऋतावृधावित्यृत—वृधौ। आविन्ने द्यावापृथिवी। आविन्ने इत्याविन्ने। द्यावापृथिवी धृतव्रते। द्यावापृथिवी इति द्यावा—पृथिवी। धृतव्रते आविन्ना। धृतव्रते इति धृत—व्रते। आविन्ना देवी। देव्यदितिः। अदितिर् विश्वरूपी। विश्वरूप्याविन्नः। विश्वरूपीति विश्व—रूपी। आविन्नो ऽयम्। अयमसौ। असावामुष्यायणः। आमुष्यायणोऽस्याम्। अस्याँव्विँशि। विश्यस्मिन्न्। अस्मिन्राष्ट्रे। राष्ट्रे महते। महते क्षत्राय। क्षत्राय महते। महत आधिपत्याय। आधिपत्याय महते। आधिपत्यायेत्याधि—पत्याय। महते जानराज्याय। जानराज्यायैषः। जानराज्यायेति जान—राज्याय। एष वः। वो भरताः। भरता राजा। राजा सोमः। सोमो ऽस्माकम्। अस्माकम् ब्राह्मणानाम्। ब्राह्मणानाꣳ राजा। राजेन्द्रस्य। इन्द्रस्य वज्रः। ॥ [२२] ॥ वज्रोऽसि। असि वार्त्रघ्नः। वार्त्रघ्नस्त्वया। वार्त्रघ्न इति वार्त्र—घ्नः। त्वयाऽयम्। अयँव्वृत्रम्। वृत्रँव्वँद्ध्यात्। वद्ध्याच्छत्रुबाधनाः। शत्रुबाधनाः स्थ। शत्रुबाधना इति शत्रु—बाधनाः। स्थ पात। पात मा। मा प्रत्यञ्चम्। प्रत्यञ्चम् पात। पात मा। मा तिर्यञ्चम्। तिर्यञ्चमन्वञ्चम्। अन्वञ्चम् मा। मा पात। पात दिग्भ्यः। दिग्भ्यो मा। दिग्भ्य इति दिक्—भ्यः। मा पात। पात विश्वाभ्यः। विश्वाभ्यो मा। मा नाष्ट्राभ्यः। नाष्ट्राभ्यः पात। पात हिरण्यवर्णौ। हिरण्यवर्णावुषसाम्। हिरण्यवर्णाविति हिरण्य—वर्णौ। उष-

साँव्वि॒रो॒के। वि॒रो॒के ऽय॑ःस्थूणौ। वि॒रो॒क इति॑ वि—रो॒के। अय॑ःस्थूणा॒वुदि॑तौ। अय॑ःस्थूणावि-
त्यय॑ः—स्थू॒णौ। उदि॑तौ॒ सूर्य॑स्य। उदि॑ता॒वित्युत्—इ॒तौ। सूर्य॑स्या। आ रो॑हतम्। रो॒ह॒तँव्व॒रु॒ण।
व॒रु॒ण मि॒त्र। मि॒त्र गर्त॑म्। गर्त॑म् तत॑ः। तत॑श्चक्षाथाम्। च॒क्षा॒था॒मदि॑तिम्। अदि॑ति॒म् दिति॑म्।
दिति॑म् च। चेति॑ च॥ ॥ [२३] ॥

(शिशु रिन्द्र॒स्यै क॑चत्वारि॑ꣳशच्च) ॥ १२ ॥

स॒मिध॒मा। स॒मिध॒मिति॑ सम्—इध॑म्। आ ति॑ष्ठ। ति॒ष्ठ गा॒य॒त्री। गा॒य॒त्री त्वा॑। त्वा॒ छन्द॑साम्।
छन्द॑सामवतु। अ॒व॒तु त्रि॒वृत्। त्रि॒वृथ् स्तोम॑ः। त्रि॒वृदिति॑ त्रि—वृत्। स्तोमो॑ रथन्त॒रम्। र॒थ॒न्त॒रꣳ
साम॑। र॒थ॒न्त॒रमिति॑ रथम्—त॒रम्। सामा॒ग्निः। अ॒ग्निर् दे॒वता॑। दे॒वता॒ ब्रह्म॑। ब्रह्म॒ द्रवि॑णम्।
द्रवि॑णमु॒ग्राम्। उ॒ग्रामा। आ ति॑ष्ठ। ति॒ष्ठ॒,त्रि॒ष्टुप्। त्रि॒ष्टुप्,त्वा॑। त्वा॒ छन्द॑साम्। छन्द॑सामवतु।
अ॒व॒तु॒ प॒ञ्च॒द॒शः। प॒ञ्च॒द॒शः स्तोम॑ः। प॒ञ्च॒द॒श इति॑ पञ्च—द॒शः। स्तोमो॑ बृ॒हत्। बृ॒हथ् साम॑।
सामेन्द्र॑ः। इन्द्रो॑ दे॒वता॑। दे॒वता॑ क्ष॒त्रम्। क्ष॒त्रम् द्रवि॑णम्। द्रवि॑णँव्वि॒राज॑म्। वि॒रा॒ज॒मा।
वि॒रा॒ज॒मिति॑ वि—राज॑म्। आ ति॑ष्ठ। ति॒ष्ठ जग॑ती। जग॑ती त्वा। त्वा॒ छन्द॑साम्। छन्द॑सामवतु।
अ॒व॒तु स॒प्त॒द॒शः। स॒प्त॒द॒शः स्तोम॑ः। स॒प्त॒द॒श इति॑ सप्त—द॒शः। स्तोमो॑ वै॒रू॒पम्। वै॒रू॒पꣳ साम॑।
साम॑ म॒रुत॑ः। म॒रुतो॑ दे॒वता॑। दे॒वता॒ विट्। वि॒ड् द्रवि॑णम्। द्रवि॑णमु॒दीची॑म्। उ॒दीची॒मा। आ
ति॑ष्ठ। ति॒ष्ठा॒नु॒ष्टुप्। अ॒नु॒ष्टुप्त्वा॑। अ॒नु॒ष्टु॒बित्य॑नु—स्तुप्। त्वा॒ छन्द॑साम्। ॥ [२४] ॥ छन्द॑साम-
वतु। अ॒व॒त्वे॒क॒वि॒ꣳश॒ः। ए॒क॒वि॒ꣳश॒ः स्तोम॑ः। ए॒क॒वि॒ꣳश इत्येक॑—वि॒ꣳश॒ः। स्तोमो॑ वै॒रा॒जम्।
वै॒रा॒जꣳ साम॑। साम॑ मि॒त्रावरु॑णौ। मि॒त्रावरु॑णौ दे॒वता॑। मि॒त्रावरु॑णा॒विति॑ मि॒त्रा—वरु॑णौ। दे॒वता॒
बल॑म्। बल॒म् द्रवि॑णम्। द्रवि॑णमू॒द्ध्वाम्। ऊ॒द्ध्वामा। आ ति॑ष्ठ। ति॒ष्ठ प॒ङ्क्तिः। प॒ङ्क्तिस्त्वा॑।
त्वा॒ छन्द॑साम्। छन्द॑सामवतु। अ॒व॒तु त्रि॒ण॒व॒त्र॒य॒स्त्रि॒ꣳशौ। त्रि॒ण॒व॒त्र॒य॒स्त्रि॒ꣳशौ स्तोमौ॑। त्रि॒ण-
व॒त्र॒य॒स्त्रि॒ꣳशा॒विति॑ त्रिणव—त्र॒य॒स्त्रि॒ꣳशौ। स्तोमौ॑ शाक्वररै॒वते। शा॒क्व॒र॒रै॒वते साम॑नी। शा॒क्व-
र॒रै॒वते इति॑ शाक्वर—रै॒वते। साम॑नी बृ॒हस्पति॑ः। साम॑नी॒ इति॑ साम॑नी। बृ॒हस्पति॑र् दे॒वता॑।
दे॒वता॒ वर्च॑ः। वर्चो॑ द्रवि॑णम्। द्रवि॑णमी॒दृङ्। ई॒दृङ् च॑। चा॒न्यादृङ्। अ॒न्यादृङ् च॑। चै॒तादृङ्।
ए॒तादृङ् च॑। च॒ प्र॒ति॒दृङ्। प्र॒ति॒दृङ् च॑। प्र॒ति॒दृङ्ङिति॑ प्रति—दृङ्ङ्। च॒ मित॑ः। मित॑श्च।

च सम्मितः। सम्मितश्च। सम्मित इति सम्—मितः। च सभराः। सभरा इति स—भराः॥ शुक्रज्योतिश्च। शुक्रज्योतिरिति शुक्र—ज्योतिः। च चित्रज्योतिः। चित्रज्योतिश्च। चित्रज्योतिरिति चित्र—ज्योतिः। च सत्यज्योतिः। सत्यज्योतिश्च। सत्यज्योतिरिति सत्य—ज्योतिः। च ज्योतिष्मान्। ज्योतिष्माꣳश्च। च सत्यः। सत्यश्च। चर्तपाः। ऋतपाश्च। ऋतपा इत्यृत—पाः। चात्यꣳहाः। ॥ [२५] ॥ अत्यꣳहा इत्यति—अꣳहाः॥ अग्नये स्वाहा। स्वाहा सोमाय। सोमाय स्वाहा। स्वाहा सवित्रे। सवित्रे स्वाहा। स्वाहा सरस्वत्यै। सरस्वत्यै स्वाहा। स्वाहा पूष्णे। पूष्णे स्वाहा। स्वाहा बृहस्पतये। बृहस्पतये स्वाहा। स्वाहेन्द्राय। इन्द्राय स्वाहा। स्वाहा घोषाय। घोषाय स्वाहा। स्वाहा श्लोकाय। श्लोकाय स्वाहा। स्वाहा ऽꣳशाय। अꣳशाय स्वाहा। स्वाहा भगाय। भगाय स्वाहा। स्वाहा क्षेत्रस्य। क्षेत्रस्य पतये। पतये स्वाहा। स्वाहा पृथिव्यै। पृथिव्यै स्वाहा। स्वाहा ऽन्तरिक्षाय। अन्तरिक्षाय स्वाहा। स्वाहा दिवे। दिवे स्वाहा। स्वाहा सूर्याय। सूर्याय स्वाहा। स्वाहा चन्द्रमसे। चन्द्रमसे स्वाहा। स्वाहा नक्षत्रेभ्यः। नक्षत्रेभ्यः स्वाहा। स्वाहाऽद्भ्यः। अद्भ्यः स्वाहा। अद्भ्य इत्यत्—भ्यः। स्वाहौषधीभ्यः। ओषधीभ्यः स्वाहा। ओषधीभ्य इत्योषधि—भ्यः। स्वाहा वनस्पतिभ्यः। वनस्पतिभ्यः स्वाहा। वनस्पतिभ्य इति वनस्पति—भ्यः। स्वाहा चराचरेभ्यः। चराचरेभ्यः स्वाहा। स्वाहा परिप्लवेभ्यः। परिप्लवेभ्यः स्वाहा। परिप्लवेभ्य इति परि—प्लवेभ्यः। स्वाहा सरीसृपेभ्यः। सरीसृपेभ्यः स्वाहा। स्वाहेति स्वाहा॥ ॥ [२६] ॥

(अनुष्टुब्व र्तपाश्च सरीसृपेभ्यः स्वाहा) ॥ १३ ॥

सोमस्य त्विषिः। त्विषिरसि। असि तव। तवेव। इव मे। मे त्विषिः। त्विषिर् भूयात्। भूयादमृतम्। अमृतमसि। असि मृत्योः। मृत्योर्,मा। मा पाहि। पाहि दिद्योत्। दिद्योन्मा। मा पाहि। पाह्यवेष्टाः। अवेष्टा दन्दशूकाः। अवेष्टा इत्यव—इष्टाः। दन्दशूका निरस्तम्। निरस्तम् नमुचेः। निरस्तमिति निः—अस्तम्। नमुचेः शिरः। शिर इति शिरः॥ सोमो राजा। राजा वरुणः। वरुणो देवाः। देवा धर्मसुवः। धर्मसुवश्च। धर्मसुव इति धर्म—सुवः। च ये। य इति ये॥ ते ते। ते वाचम्। वाचꣳ सुवन्ताम्। सुवन्ताम् ते। ते ते। ते प्राणम्। प्राणꣳ सुवन्ताम्।

प्राणमिति प्र—अनम्। सुवन्ताम् ते। ते तेँ। ते चक्षुः। चक्षुः सुवन्ताम्। सुवन्ताम् ते। ते तेँ। ते श्रोत्रम्। श्रोत्रꣳ सुवन्ताम्। सुवन्ताꣳ सोमस्य। सोमस्य त्वा। त्वा द्युम्नेन। द्युम्नेनाभि। अभि षिञ्चामि। सिञ्चाम्यग्नेः। अग्ने स्तेजसा। ॥ [२७] ॥ तेजसा सूर्यस्य। सूर्यस्य वर्चसा। वर्चसे-न्द्रस्य। इन्द्रस्येन्द्रियेण। इन्द्रियेण मित्रावरुणयोः। मित्रावरुणयोर्,वीर्येण। मित्रावरुणयोरिति मित्रा—वरुणयोः। वीर्येण मरुताम्। मरुतामोजसा। ओजसा क्षत्राणाम्। क्षत्राणाम् क्षत्र-पतिः। क्षत्रपतिरसि। क्षत्रपतिरिति क्षत्र—पतिः। अस्यति। अति दिवः। दिवस्पाहि। पाहि समाववृत्रन्न्। समाववृत्रन्नधराक्। समाववृत्रन्निति सम्—आववृत्रन्न्। अधरागुदीचीः। उदी-चीरहिम्। अहिम् बुद्धियम्। बुद्धियमनु। अनु सञ्चरन्तीः। सञ्चरन्तीस्ताः। सञ्चरन्तीरिति सम्—चरन्तीः। ताः पर्वतस्य। पर्वतस्य वृषभस्य। वृषभस्य पृष्ठे। पृष्ठे नावः। नावश्चरन्ति। चरन्ति स्वसिचः। स्वसिच इयानाः। स्वसिच इति स्व—सिचः। इयाना इतीयानाः॥ रुद्र यत्। यत् तेँ। ते क्रयि। क्रयी परम्। परम् नाम। नाम तस्मैँ। तस्मै हुतम्। हुतमसि। असि यमेष्टम्। यमेष्टमसि। यमेष्टमिति यम—इष्टम्। असीत्यसि॥ प्रजापते न। प्रजापत इति प्रजा—पते। न त्वत्। त्वदेतानि। एतान्यन्यः। अन्यो विश्वा। विश्वा जातानि। जातानि परि। परि ता। ता बभूव। बभूवेति बभूव॥ यत्कामास्ते। यत्कामा इति यत्—कामाः। ते जुहुमः। जुहुमस्तत्। तन्नः। नो अस्तु। अस्तु वयम्। वयꣳ स्याम। स्याम पतयः। पतयो रयीणाम्। रयीणामिति रयीणाम्॥ ॥ [२८] ॥

(अग्ने स्तौ कादश च) ॥ १४ ॥

---

इन्द्रस्य वज्रः। वज्रोऽसि। असि वार्त्रघ्नः। वार्त्रघ्नस्त्वया। वार्त्रघ्न इति वार्त्र—घ्नः। त्वयाऽयम्। अयँवृत्रम्। वृत्रँव्वध्यात्। वध्यान्,मित्रावरुणयोः। मित्रावरुणयो,स्त्वा। मित्रा-वरुणयोरिति मित्रा—वरुणयोः। त्वा प्रशास्त्रोः। प्रशास्त्रोः प्रशिषा। प्रशास्त्रोरिति प्र—शास्त्रोः। प्रशिषा युनज्मि। प्रशिषेति प्र—शिषा। युनज्मि यज्ञस्य। यज्ञस्य योगेन। योगेन विष्णोः। विष्णोः क्रमः। क्रमोऽसि। असि विष्णोः। विष्णोः क्रान्तम्। क्रान्तमसि। असि विष्णोः। विष्णोर् विक्रान्तम्। विक्रान्तमसि। विक्रान्तमिति वि—क्रान्तम्। असि मरुताम्। मरुताम्

प्रसवे। प्रसवे जेषम्। प्रसव इति प्र—सवे। जेषमाप्तम्। आप्तम् मनः। मनः सम्। समहम्। अहमिन्द्रियेण। इन्द्रियेण वीर्येण। वीर्येण पशूनाम्। पशूनाम् मन्युः। मन्युरसि। असि तव। तवेव। इव मे। मे मन्युः। मन्युर् भूयात्। भूयान्नमः। नमो मात्रे। मात्रे पृथिव्यै। पृथिव्यै मा। माऽहम्। अहम् मातरम्। मातरम् पृथिवीम्। पृथिवीꣳ हिꣳसिषम्। हिꣳसिषम् मा। मा माम्। ॥ [२९] ॥ माम् माता। माता पृथिवी। पृथिवी हिꣳसीत्। हिꣳसीदियत्। इयदसि। अस्यायुः। आयुरसि। अस्यायुः। आयुर्,मे। मे धेहि। धेह्यूर्क्। ऊर्गसि। अस्यूर्जम्। ऊर्जम् मे। मे धेहि। धेहि युङ्। युङ्ङसि। असि वर्चः। वर्चोऽसि। असि वर्चः। वर्चो मयि। मयि धेहि। धेह्यग्नये। अग्नये गृहपतये। गृहपतये स्वाहा। गृहपतय इति गृह—पतये। स्वाहा सोमाय। सोमाय वनस्पतये। वनस्पतये स्वाहा। स्वाहेन्द्रस्य। इन्द्रस्य बलाय। बलाय स्वाहा। स्वाहा मरुताम्। मरुतामोजसे। ओजसे स्वाहा। स्वाहा हꣳसः। हꣳसः शुचिषत्। शुचिषद् वसुः। शुचिषदिति शुचि—सत्। वसु रन्तरिक्षसत्। अन्तरिक्षसद्धोता। अन्तरिक्षसदित्यन्त-रिक्ष—सत्। होता वेदिषत्। वेदिषदतिथिः। वेदिषदिति वेदि—सत्। अतिथिर्,दुरोणसत्। दुरोणसदिति दुरोण—सत्॥ नृषद् वरसत्। नृषदिति नृ—सत्। वरसदृतसत्। वरसदिति वर—सत्। ऋतसद् व्योमसत्। ऋतसदित्यृत—सत्। व्योमसदब्जाः। व्योमसदिति व्योम—सत्। अब्जा गोजाः। अब्जा इत्यप्—जाः। गोजा ऋतजाः। गोजा इति गो—जाः। ऋतजा अद्रिजाः। ऋतजा इत्यृत—जाः। अद्रिजा ऋतम्। अद्रिजा इत्यद्रि—जाः। ऋतम् बृहत्। बृहदिति बृहत्॥ ॥ [३०] ॥

(हिꣳसिषं म र्तजा स्त्रीणि च) ॥ १५ ॥

---

मित्रोऽसि। असि वरुणः। वरुणोऽसि। असि सम्। समहम्। अहविँश्वैः। विश्वैर्,देवैः। देवैः क्षत्रस्य। क्षत्रस्य नाभिः। नाभिरसि। असि क्षत्रस्य। क्षत्रस्य योनिः। योनिरसि। असि स्योनाम्। स्योनामा। आ सीद। सीद सुषदाम्। सुषदामा। सुषदामिति सु—सदाम्। आ सीद। सीद मा। मा त्वा। त्वा हिꣳसीत्। हिꣳसीन्मा। मा मा। मा हिꣳसीत्। हिꣳसीन्नि। नि षसाद। ससाद धृतव्रतः। धृतव्रतो वरुणः। धृतव्रत इति धृत—व्रतः। वरुणः पस्त्यासु। पस्त्यास्वा। आ

साम्राँज्याय। साम्राँज्याय सुक्रतुः। साम्राँज्यायेति साम्—राज्याय। सुक्रतुर्‌,ब्रह्मा(३)न्। सुक्र-तुरिति सु—क्रतुः। ब्रह्मा(३)न्त्वम्। त्वꣳ राजन्न्। राजन् ब्रह्मा। ब्रह्माऽसि। असि सविता। सवि-ताऽसि। असि सत्यसवः। सत्यसवो ब्रह्मा(३)न्। सत्यसव इति सत्य—सवः। ब्रह्मा(३)न्त्वम्। त्वꣳ राजन्न्। राजन् ब्रह्मा। ब्रह्माऽसि। असीन्द्रः। इन्द्रोऽसि। असि सत्यौजाः। सत्यौजा ब्रह्मा(३)न्। सत्यौजा इति सत्य—ओजाः। ॥ [३१] ॥ ब्रह्मा(३)न्त्वम्। त्वꣳ राजन्न्। राजन्‌,ब्रह्मा। ब्रह्माऽसि। असि मित्रः। मित्रोऽसि। असि सुशेवः। सुशेवो ब्रह्मा(३)न्। सुशेव इति सु—शेवः। ब्रह्मा(३)न्त्वम्। त्वꣳ राजन्न्। राजन्‌,ब्रह्मा। ब्रह्माऽसि। असि वरुणः। वरुणोऽसि। असि सत्यधर्मा। सत्यधर्मेन्द्रस्य। सत्यधर्मेति सत्य—धर्मा। इन्द्रस्य वज्रः। वज्रोऽसि। असि वार्त्रघ्नः। वार्त्रघ्नस्तेन। वार्त्रघ्न इति वार्त्र—घ्नः। तेन मे। मे रध्य। रध्य दिशः। दिशोऽभि। अभ्ययम्। अयꣳ राजा। राजाऽभूत्। अभूथ् सुश्लोका(४)। सुँश्लोका(४) सुँमङ्गला(४)। सुँश्लोका(४) इँति सु—श्लोका(४)। सुँमङ्गला(४) सँत्यराजा(३)न्। सुम-ङ्गला(४) इँति सु—मङ्गला(४)। सँत्यराजा(३)निति सत्य—राजा(३)न्॥ अपाम् नप्त्रे। नप्त्रे स्वाहा। स्वाहोर्जः। ऊर्जो नप्त्रे। नप्त्रे स्वाहा। स्वाहा ऽग्नये। अग्नये गृहपतये। गृहपतये स्वाहा। गृहपतय इति गृह—पतये। स्वाहेति स्वाहा॥ ॥ [३२] ॥

(सत्यौजाश्चत्वारिꣳशाच्च) ॥ १६ ॥

---

आग्नेयमष्टाकपालम्। अष्टाकपालम् निः। अष्टाकपालमित्यष्टा—कपालम्। निर् वपति। वपति हिरण्यम्। हिरण्यम् दक्षिणा। दक्षिणा सारस्वतम्। सारस्वतम् चरुम्। चरुँवथ्स-तरी। वथ्सतरी दक्षिणा। दक्षिणा सावित्रम्। सावित्रम् द्वादशकपालम्। द्वादशकपालमु-पध्वस्तः। द्वादशकपालमिति द्वादश—कपालम्। उपध्वस्तो दक्षिणा। उपध्वस्त इत्युप—ध्वस्तः। दक्षिणा पौष्णम्। पौष्णम् चरुम्। चरुꣳ श्यामः। श्यामो दक्षिणा। दक्षिणा बार्हस्पत्यम्। बार्हस्पत्यम् चरुम्। चरुꣳ शितिपृष्ठः। शितिपृष्ठो दक्षिणा। शितिपृष्ठ इति शिति—पृष्ठः। दक्षिणैन्द्रम्। ऐन्द्रमेकादशकपालम्। एकादशकपालमृषभः। एकादशकपाल-मित्येकादश—कपालम्। ऋषभो दक्षिणा। दक्षिणा वारुणम्। वारुणम् दशकपालम्। दश-

कपालम् महानिरष्टः। दशकपालमिति दश—कपालम्। महानिरष्टो दक्षिणा। महानिरष्ट इति महा—निरष्टः। दक्षिणा सौम्यम्। सौम्यम् चरुम्। चरुम् बभ्रुः। बभ्रुर्दक्षिणा। दक्षिणा त्वाष्ट्रम्। त्वाष्ट्रमष्टाकपालम्। अष्टाकपालꣳ शुण्ठः। अष्टाकपालमित्यष्टा—कपालम्। शुण्ठो दक्षिणा। दक्षिणा वैष्णवम्। वैष्णवम् त्रिकपालम्। त्रिकपालव्ँवामनः। त्रिकपालमिति त्रि—कपालम्। वामनो दक्षिणा। दक्षिणेति दक्षिणा। ॥ [३३] ॥

(आग्नेयꣳ हिरण्यꣳ सारस्वतं द्विचत्वारिꣳशत्) ॥ १७ ॥

सद्यो दीक्षयन्ति। दीक्षयन्ति सद्यः। सद्यः सोमम्। सोमम् क्रीणन्ति। क्रीणन्ति पुण्डरिस्रजाम्। पुण्डरिस्रजाम् प्र। प्र यच्छति। यच्छति दशभिः। दशभिर्वथ्सतरैः। दशभिरिति दश—भिः। वथ्सतरैः सोमम्। सोमम् क्रीणाति। क्रीणाति दशपेयः। दशपेयो भवति। दशपेय इति दश—पेयः। भवति शतम्। शतम् ब्राह्मणाः। ब्राह्मणाः पिबन्ति। पिबन्ति सप्तदशम्। सप्तदशꣳ स्तोत्रम्। सप्तदशमिति सप्त—दशम्। स्तोत्रम् भवति। भवति प्राकाशौ। प्राकाशावद्ध्वर्यवे। अद्ध्वर्यवे ददाति। ददाति स्रजम्। स्रजमुद्गात्रे। उद्गात्रे रुक्मम्। उद्गात्र इत्युत्—गात्रे। रुक्मꣳ होत्रे। होत्रेऽश्वम्। अश्वम् प्रस्तोतृप्रतिहर्तृभ्याम्। प्रस्तोतृप्रतिहर्तृभ्याम् द्वादश। प्रस्तोतृप्रतिहर्तृभ्यामिति प्रस्तोतृप्रतिहर्तृ—भ्याम्। द्वादश पष्ठौहीः। पष्ठौहीर्ब्रह्मणे। ब्रह्मणे वशाम्। वशाम् मैत्रावरुणाय। मैत्रावरुणायर्षभम्। मैत्रावरुणायेति मैत्रा—वरुणाय। ऋषभम् ब्राह्मणाच्छꣳसिने। ब्राह्मणाच्छꣳसिने वाससी। वाससी नेष्टापोतृभ्याम्। वाससी इति वाससी। नेष्टापोतृभ्याꣳ स्थूरि। नेष्टापोतृभ्यामिति नेष्टापोतृ—भ्याम्। स्थूरि यवाचितम्। यवाचितमच्छावाकाय। यवाचितमिति यव—आचितम्। अच्छावाकायानड्वाहम्। अनड्वाहमग्नीधे। अग्नीधे भार्गवः। अग्नीध इत्यग्नि—इधे। भार्गवो होता। होता भवति। भवति श्रायन्तीयम्। श्रायन्तीयम् ब्रह्मसामम्। ब्रह्मसामम् भवति। ब्रह्मसाममिति ब्रह्म—सामम्। भवति वारवन्तीयम्। वारवन्तीयमग्निष्टोमसामम्। वारवन्तीयमिति वार—वन्तीयम्। अग्निष्टोमसामꣳ सारस्वतीः। अग्निष्टोमसाममित्यग्निष्टोम—सामम्। सारस्वतीरपः। अपो गृह्णाति। गृह्णातीति गृह्णाति॥ ॥ [३४] ॥

(वारवन्तीयं चत्वारि च) ॥ १८ ॥

आग्नेयमष्टाकपालम्। अष्टाकपालम् निः। अष्टाकपालमित्यष्टा—कपालम्। निर् वपति। वपति हिरण्यम्। हिरण्यम् दक्षिणा। दक्षिणैन्द्रम्। ऐन्द्रमेकादशकपालम्। एकादशकपालमृषभः। एकादशकपालमित्येकादश—कपालम्। ऋषभो दक्षिणा। दक्षिणा वैश्वदेवम्। वैश्वदेवम् चरुम्। वैश्वदेवमिति वैश्व—देवम्। चरुम् पिशङ्गी। पिशङ्गी पष्ठौही। पष्ठौही दक्षिणा। दक्षिणा मैत्रावरुणीम्। मैत्रावरुणीमामिक्षाम्। मैत्रावरुणीमिति मैत्रा—वरुणीम्। आमिक्षाँ वशा। वशा दक्षिणा। दक्षिणा बार्हस्पत्यम्। बार्हस्पत्यम् चरुम्। चरुꣳ शितिपृष्ठः। शितिपृष्ठो दक्षिणा। शितिपृष्ठ इति शिति—पृष्ठः। दक्षिणा ऽऽदित्याम्। आदित्याम् मलहाम्। मलहाम् गर्भिणीम्। गर्भिणीमा। आ लभते। लभते मारुतीम्। मारुतीम् पृश्निम्। पृश्निम् पष्ठौहीम्। पष्ठौहीमश्विभ्याम्। अश्विभ्याम् पूष्णे। अश्विभ्यामित्यश्वि—भ्याम्। पूष्णे पुरोडाशम्। पुरोडाशम् द्वादशकपालम्। द्वादशकपालम् निः। द्वादशकपालमिति द्वादश—कपालम्। निर् वपति। वपति सरस्वते। सरस्वते सत्यवाचे। सत्यवाचे चरुम्। सत्यवाच इति सत्य—वाचे। चरुꣳ सवित्रे। सवित्रे सत्यप्रसवाय। सत्यप्रसवाय पुरोडाशम्। सत्यप्रसवायेति सत्य—प्रसवाय। पुरोडाशम् द्वादशकपालम्। द्वादशकपालम् तिसृधन्वम्। द्वादशकपालमिति द्वादश—कपालम्। तिसृधन्वꣳ शुष्कदृतिः। तिसृधन्वमिति तिसृ—धन्वम्। शुष्कदृतिर् दक्षिणा। शुष्कदृतिरिति शुष्क—दृतिः। दक्षिणेति दक्षिणा। ॥ [३५] ॥

(अग्नेयꣳ हिरण्यमैन्द्रमृषभो वैश्वदेवं पिशङ्गी बार्हस्पत्यꣳ सप्तचत्वारिꣳशत्) ॥ १९ ॥

आग्नेयमष्टाकपालम्। अष्टाकपालम् निः। अष्टाकपालमित्यष्टा—कपालम्। निर् वपति। वपति सौम्यम्। सौम्यम् चरुम्। चरुꣳ सावित्रम्। सावित्रम् द्वादशकपालम्। द्वादशकपालम् बार्हस्पत्यम्। द्वादशकपालमिति द्वादश—कपालम्। बार्हस्पत्यम् चरुम्। चरुम् त्वाष्ट्रम्।

त्वाष्ट्रमष्टाकपालम्। अष्टाकपालवैँश्वानरम्। अष्टाकपालमित्यष्टा—कपालम्। वैश्वानरम् द्वादशकपालम्। द्वादशकपालम् दक्षिणः। द्वादशकपालमिति द्वादश—कपालम्। दक्षिणो रथवाहनवाहः। रथवाहनवाहो दक्षिणा। रथवाहनवाह इति रथवाहन—वाहः। दक्षिणा सारस्वतम्। सारस्वतम् चरुम्। चरुम् निः। निर् वपति। वपति पौष्णम्। पौष्णम् चरुम्। चरुम् मैत्रम्। मैत्रम् चरुम्। चरुवाँरुणम्। वारुणम् चरुम्। चरुम् क्षैत्रपत्यम्। क्षैत्रपत्यम् चरुम्। क्षैत्रपत्यमिति क्षैत्र—पत्यम्। चरुमादित्यम्। आदित्यम् चरुम्। चरुमुत्तरः। उत्तरो रथवाहनवाहः। उत्तर इत्युत्—तरः। रथवाहनवाहो दक्षिणा। रथवाहनवाह इति रथवाहन—वाहः। दक्षिणेति दक्षिणा॥ ॥ [३६] ॥

(आग्नेयꣳ सौम्यं बार्हस्पत्यं चतुस्त्रिꣳशत्) ॥ २० ॥

स्वाद्वीम् त्वा। त्वा स्वादुना। स्वादुना तीव्राम्। तीव्राम् तीव्रेण। तीव्रेणामृताम्। अमृताममृतेन। अमृतेन सृजामि। सृजामि सम्। सꣳ सोमेन। सोमेन सोमः। सोमोऽसि। अस्यश्विभ्याम्। अश्विभ्याम् पच्यस्व। अश्विभ्यामित्यश्वि—भ्याम्। पच्यस्व सरस्वत्यै। सरस्वत्यै पच्यस्व। पच्यस्वेन्द्राय। इन्द्राय सुत्राम्णे। सुत्राम्णे पच्यस्व। सुत्राम्ण इति सु—त्राम्णे। पच्यस्व पुनातु। पुनातु ते। ते परिस्रुतम्। परिस्रुतꣳ सोमम्। परिस्रुतमिति परि—स्रुतम्। सोमꣳ सूर्यस्य। सूर्यस्य दुहिता। दुहितेति दुहिता॥ वारेण शश्वता। शश्वता तना। तनेति तना॥ वायुः पूतः। पूतः पवित्रेण। पवित्रेण प्रत्यङ्। प्रत्यङ् क्सोमः। सोमो अतिद्रुतः। अतिद्रुत इत्यति—द्रुतः। इन्द्रस्य युज्यः। युज्यः सखा। सखेति सखा॥ कुविदङ्ग। अङ्ग यवमन्तः। यवमन्तो यवम्। यवमन्त इति यव—मन्तः। यवम् चित्। चिद् यथा। यथा दान्ति। दान्त्यनुपूर्वम्। अनुपूर्वंविँयूय। अनुपूर्वमित्यनु—पूर्वम्। वियूयेति वि—यूय॥ इहेहैषाम्। इहेहेतीह—इह। एषाम् कृणुत। कृणुत भोजनानि। भोजनानि ये। ये बर्हिषः। बर्हिषो नमोवृक्तिम्। नमोवृक्तिम् न। नमोवृक्तिमिति नमः—वृक्तिम्। न जग्मुः। जग्मुरिति जग्मुः॥ आश्विनम् धूम्रम्। धूम्रमा। आ लभते। लभते सारस्वतम्। सारस्वतम् मेषम्। मेषमैन्द्रम्। ऐन्द्रमृषभम्। ऋषभमैन्द्रम्। ऐन्द्रमेकादशकपालम्। एकादशकपालम् निः। एकादशकपालमित्येकादश—कपालम्। निर्

वपति। वपति सावित्रम्। सावित्रम् द्वादशकपालम्। द्वादशकपालँव्वारुणम्। द्वादशकपाल-
मिति द्वादश—कपालम्। वारुणम् दशकपालम्। दशकपालꣳ सोमप्रतीकाः। दशकपालमिति
दश—कपालम्। सोमप्रतीकाः पितरः। सोमप्रतीका इति सोम—प्रतीकाः। पितरस्तृप्णुत।
तृप्णुत वडबा। वडबा दक्षिणा। दक्षिणेति दक्षिणा॥ ॥ [३७] ॥

(भोजनानि षड्विꣳशतिश्च) ॥ २१ ॥

अग्नाविष्णू महि। अग्नाविष्णू इत्यग्ना—विष्णू। महि तत्। तद् वाम्। वाम् महित्वम्। महि-
त्वँव्वीतम्। महित्वमिति महि—त्वम्। वीतम् घृतस्य। घृतस्य गुह्यानि। गुह्यानि नाम। नामेति
नाम॥ दमेदमे सप्त। दमेदम इति दमे—दमे। सप्त रत्ना। रत्ना दधाना। दधाना प्रति। प्रति वाम्।
वाम् जिह्वा। जिह्वा घृतम्। घृतमा। आ चरण्येत्। चरण्येदिति चरण्येत्॥ अग्नाविष्णू महि।
अग्नाविष्णू इत्यग्ना—विष्णू। महि धाम। धाम प्रियम्। प्रियँव्वाम्। वाँव्वीथः। वीथो घृतस्य।
घृतस्य गुह्या। गुह्या जुषाणा। जुषाणेति जुषाणा॥ दमेदमे सुष्टुतीः। दमेदम इति दमे—दमे।
सुष्टुतीर्,वावृधाना। सुष्टुतीरिति सु—स्तुतीः। वावृधाना,प्रति। प्रति वाम्। वाम् जिह्वा। जिह्वा
घृतम्। घृतमुत्। उच्चरण्येत्। चरण्येदिति चरण्येत्॥ प्र णः। नो देवी। देवी सरस्वती। सर-
स्वती वाजेभिः। वाजेभिर्,वाजिनीवती। वाजिनीवतीति वाजिनी—वती॥ धीनामवित्री। अवि-
त्र्यवतु॥ अवत्वित्यवतु॥ आ नः। नो दिवः। दिवो बृहतः। बृहतः पर्वतात्। ॥ [३८] ॥ पर्व-
तादा। आ सरस्वती। सरस्वती यजता। यजता गन्तु। गन्तु यज्ञम्। यज्ञमिति यज्ञम्॥ हवम्
देवी। देवी जुजुषाणा। जुजुषाणा घृताची। घृताची शग्माम्। शग्माम् नः। नो वाचम्। वाचमु-
शती। उशती शृणोतु। शृणोत्विति शृणोतु॥ बृहस्पते जुषस्व। जुषस्व नः। नो हव्यानि। हव्यानि
विश्वदेव्य। विश्वदेव्येति विश्व—देव्य॥ रास्व रत्नानि। रत्नानि दाशुषे। दाशुष इति दाशुषे॥
एवा पित्रे। पित्रे विश्वदेवाय। विश्वदेवाय वृष्णे। विश्वदेवायेति विश्व—देवाय। वृष्णे यज्ञैः।
यज्ञैर्,विधेम। विधेम नमसा। नमसा हविर्भिः। हविर्भिरिति हविः—भिः। बृहस्पते सुप्रजाः।
सुप्रजा वीरवन्तः। सुप्रजा इति सु—प्रजाः। वीरवन्तो वयम्। वीरवन्त इति वीर—वन्तः। वयꣳ
स्याम। स्याम पतयः। पतयो रयीणाम्। रयीणामिति रयीणाम्॥ बृहस्पते अति। अति यत्।

यदर्यः। अर्यो अर्हात्। अर्हाद् द्युमत्। द्युमद् विभाति। द्युमदिति द्यु—मत्। विभाति क्रतुमत्।
विभातीति वि—भाति। क्रतुमज्जनेषु। क्रतुमदिति क्रतु—मत्। जनेष्विति जनेषु॥ यद् दीदयत्।
दीदयच्छवसा। शवसर्तप्रजात। ॥ [३९] ॥ ऋतप्रजात तत्। ऋतप्रजातेत्यृत—प्रजात। तद्-
स्मासु। अस्मासु द्रविणम्। द्रविणम् धेहि। धेहि चित्रम्। चित्रमिति चित्रम्॥ आ नः। नो
मित्रावरुणा। मित्रावरुणा घृतैः। मित्रावरुणेति मित्रा—वरुणा। घृतैर्गव्यूतिम्। गव्यूतिमु-
ख्षतम्। उख्षतमित्युख्षतम्॥ मद्ध्वा रजाꣳसि। रजाꣳसि सुक्रतू। सुक्रतू इति सु—क्रतू॥
प्र बाहवा। बाहवा सिसृतम्। सिसृतम् जीवसे। जीवसे नः। न आ। आ नः। नो गव्यूतिम्।
गव्यूतिमुख्षतम्। उख्षतम् घृतेन। घृतेनेति घृतेन॥ आ नः। नो जने। जने श्रवयतम्।
श्रवयतँय्युवाना। युवाना श्रुतम्। श्रुतम् मे। मे मित्रावरुणा। मित्रावरुणा हवा। मित्रावरुणेति
मित्रा—वरुणा। हवेमा। इमेतीमा॥ अग्निँव्वः। वः पूर्व्यम्। पूर्व्यम् गिरा। गिरा देवम्। देव-
मीडे। ईडे वसूनाम्। वसूनामिति वसूनाम्॥ सपर्यन्तः पुरुप्रियम्। पुरुप्रियम् मित्रम्। पुरु-
प्रियमिति पुरु—प्रियम्। मित्रम् न। न ख्षेत्रसाधसम्। ख्षेत्रसाधसमिति ख्षेत्र—साधसम्॥
मख्षू देववतः। देववतो रथः। देववत इति देव—वतः। रथः शूरः। ॥ [४०] ॥ शूरो वा। वा
पृथ्सु। पृथ्सु कासु। पृथ्स्विति पृत्—सु। कासु चित्। चिदिति चित्॥ देवानाँय्यः। य इत्।
इन्मनः। मनो यजमानः। यजमान इयख्षति। इयख्षत्यभि। अभीत्। इदयज्वनः। अय-
ज्वनो भुवत्। भुवदिति भुवत्॥ न यजमान। यजमान रिष्यसि। रिष्यसि न। न सुन्वान।
सुन्वान न। न देवयो। देवयो इति देव—यो॥ असदत्र। अत्र सुवीर्यम्। सुवीर्यमुत। सुवीर्य-
मिति सु—वीर्यम्। उत त्यत्। त्यदाश्वश्वियम्। आश्वश्वियमित्याशु—अश्वियम्॥ नकिष्टम्। तम्
कर्मणा। कर्मणा नशत्। नशन्न। न प्र। प्र योषत्। योषन्न। न योषति। योषतीति योषति॥ उप
ख्षरन्ति। ख्षरन्ति सिन्धवः। सिन्धवो मयोभुवः। मयोभुव ईजानम्। मयोभुव इति मयः—
भुवः। ईजानम् च। च यख्ष्यमाणम्। यख्ष्यमाणम् च। च धेनवः। धेनव इति धेनवः॥
पृणन्तम् च। च पपुरिम्। पपुरिम् च। च श्रवस्यवः। ॥ [४१] ॥ श्रवस्यवो घृतस्य। घृतस्य
धाराः। धारा उप। उप यन्ति। यन्ति विश्वतः। विश्वत इति विश्वतः॥ सोमारुद्रा वि। सोमा-
रुद्रेति सोमा—रुद्रा। वि वृहतम्। वृहतँव्विषूचीम्। विषूचीममीवा। अमीवा या। या नः। नो

गयम्। गयमाविवेश। आविवेशेत्या—विवेश॥ आरे बाधेथाम्। बाधेथाम् निर्ऋतिम्। निर्-ऋतिम् पराचैः। निर्ऋतिमिति निः—ऋतिम्। पराचैः कृतम्। कृतम् चित्। चिदेनः। एनः प्र। प्र मुमुक्तम्। मुमुक्तमस्मत्। अस्मदित्यस्मत्॥ सोमारुद्रा युवम्। सोमारुद्रेति सोमा—रुद्रा। युवमेतानि। एतान्यस्मे। अस्मे विश्वा। अस्मे इत्यस्मे। विश्वा तनूषु। तनूषु भेषजानि। भेषजानि धत्तम्। धत्तमिति धत्तम्॥ अव स्यतम्। स्यतम् मुञ्चतम्॥ मुञ्चतय्ँयत्। यन्नः। नो अस्ति। अस्ति तनूषु। तनूषु बद्धम्। बद्धम् कृतम्। कृतमेनः। एनो अस्मत्। अस्मदित्यस्मत्॥ सोमा-पूषणा जनना। सोमापूषणेति सोमा—पूषणा। जनना रयीणाम्। रयीणाम् जनना। जनना दिवः। दिवो जनना। जनना पृथिव्याः। पृथिव्या इति पृथिव्याः॥ जातौ विश्वस्य। विश्वस्य भुवनस्य। भुवनस्य गोपौ। गोपौ देवाः। देवा अकृण्वन्न्। अकृण्वन्नमृतस्य। अमृतस्य नाभिम्। नाभिमिति नाभिम्। इमौ देवौ। देवौ जायमानौ। जायमानौ जुषन्त। जुषन्तेमौ। इमौ तमाꣳसि। तमाꣳसि गूहताम्। गूहतामजुष्टा। अजुष्टेत्यजुष्टा॥ आभ्यामिन्द्रः। इन्द्रः पक्वम्। पक्वमामासु। आमास्वन्तः। अन्तः सोमापूषभ्याम्। सोमापूषभ्याम् जनत्। सोमापूषभ्यामिति सोमापूष—भ्याम्। जनदुस्त्रियासु। उस्त्रिया,स्वित्युस्त्रियासु॥ ॥ [४२] ॥

(बृहतः शवसा रथः पर्पुरिं च दिवो जनना पञ्चविꣳशतिश्च) ॥ २२ ॥

॥ हरिः ॐ ॥

प्रथमकाण्डे अष्टमः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| २२ | ४२ |

ॐ